हिमसंस्कृतवार्ता:

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-115 | 1 | फरवरी 23, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ शिशिर-ऋतुः
सूर्यः उत्तरायणः फाल्गुणः कृष्ण दशमी
तिथिः फाल्गुणः 12 प्रविष्ठांशः मङ्गलमयः भवेत्

2 टीजीटी शास्त्री इत्यस्य स्थाने टीजीटी संस्कृतम् इति संस्कृतमहाविद्यालयान्, शास्त्रपरम्परां च समाप्त्यर्थं प्रथमचरणम्

3 शिक्षायाः परमं लक्ष्यं उत्तमं मानव-निर्माणं वर्तते- "डॉ. चांदकिरणसलूजा"

4 पातञ्जलयोगसूत्रम् योगशास्त्रस्य प्रणेता पतञ्जलिः

## केन्द्रीय-पञ्जीयक-सहकारि-समित्याः

### प्रथमः क्षेत्रीय-कार्यालयः पुणे-नगरे उद्घाटयिष्यते-केन्द्रीयगृह-सहकारितामन्त्री



केन्द्रीयगृह-सहकारितामन्त्री अमितशाहः सूचितवान् यत् केन्द्रीय-पञ्जीयक- सहकारि-समित्याः प्रथमः क्षेत्रीय-कार्यालयः पुणे-नगरे उद्घाटयिष्यते । असौ पुणेनगरे जनता-सहकारि-बैंक-इत्येतस्य हीरकोत्तार-जयन्त्याः समापन समारोहे प्रवदन् आसीत्। असौ अवोचत् यत् एवमेव देशस्य सहकारि-बैंक-इत्येतान् वित्तीय समस्यातः निष्कासयितुं तेषां च साहाय्यार्थं समर्थनाय च एकं अन्ब्रेला इति सङ्घटनम् निर्मितमस्ति। एतत् सङ्घटनम् सर्वान् सहकारी बैंकान् सुदृढीकर्तुं कार्यं सम्पादयिष्यति । अत्रावसरे मुख्यमन्त्री देवेन्द्रफडणवीसः उपमुख्यमन्त्रिणौ अजितपवार-एकनाथशिन्दे इत्येतौ केन्द्रीय-नागरिकोड्डयनराज्यमन्त्री मुरलीधर मोहोलः इत्यादयः च उपस्थिताः समभवन् ।

## सीमासु शान्तिं स्थापयितुं भारत-पाकिस्तान- देशयोः सेनायां सहमतिः



सीमासु शान्तिं स्थापयितुं, भविष्यकाले भ्रामक स्थितिं निवारयितुम् उपायान् अन्वेष्टुं च एकविंशत्यधिक द्वि सहस्र तमवर्षस्य युद्धविराम-सन्धेः सम्मानं कर्तुं भारत-पाकिस्तान- देशयोः सेनाः सहमतिं प्रकटितवन्तः । नियन्त्रणरेखायां (एल्. ओ. सी.) अन्ताराष्ट्रियसीमायां च सद्यः एव सीमापारस्य गोलिकाप्रहारस्य, आई. ई. डी. घटनायाः तथा च अनेकानां घटनानाम् अनन्तरं उद्विग्नताम् न्यूनीकर्तुं भारतीय-पाकिस्तानी सेनायाः प्रतिनिधयः ह्यः जम्मू-कश्मीरस्य पूञ्छ जनपदे ब्रिगेड्-कमाण्डर्-इत्येतेः उपवेशनम् आचारिततवन्तः।

## नवदिल्ल्यां समारब्धः पूसा-कृषि-विज्ञानमेलकः, कृषिमन्त्रिणा कृतमुद्घाटनम्

हिमसंस्कृतवार्ताः। पूसा-कृषि-विज्ञान मेलकः गतदिने नवदिल्ल्यां समारब्धः। त्रिदिवसात्मकस्य अस्य मेलकस्य विषयः उन्नत-कृषि-विकसित-भारतम् इत्यस्ति। एतस्मिन् कृषकेभ्यः, छात्रेभ्यः, अन्य हितधारकेश्यश्च कृषिक्षेत्रे नवीनबीजप्रकाराः, प्रौद्योगिक्यश्च प्रदर्शिताः। केन्द्रीय कृषिः-कृषक-कल्याण-मन्त्री शिवराजसिंह चौहानः कार्यक्रमस्यास्य उद्घाटनम् अकरोत् । अवसरेऽस्मिन् श्री चौहानः प्रोक्तवान् यत् सर्वकारः सप्तचत्वारिंशदधिक-द्विसहस्त्रतमवर्ष यावत् भारतं विकसित-राष्ट्रत्वेन निर्मातुम् अनवरतप्रयासरतो विद्यते। श्री-चौहानेन उच्च-गुणवत्तायुक्त-बीजानां महत्त्वं प्रकाशयता कथितं यत् सर्वोत्तम-बीजानि कृषकाः यावच्छीघ्रं प्राप्नुयुः।




वर्षेऽस्मिन् कृषिविज्ञान-मेलके मुख्याकर्षणस्य केन्द्रं भारतीय-कृषि-अनुसन्धान - संस्थानेन विकसितं अत्याधुनिक- बीज प्रकारकाणां प्रौद्योगिकीनाञ्च सजीव-प्रदर्शनम् इत्यस्ति। कृषिकृषक-कल्याणराज्यमन्त्रिणौ रामनाथठाकुर-भागीरथचौधरी इत्येतौ अस्य मासस्य चतुर्विंशे दिनाङ्के समापन सत्रस्य मुख्यातिथी भविष्यतः ।

## भारतम् वैश्विकपटले नेतुं नवीन राष्ट्रिय-शिक्षा-नीत्याः परिकल्पना संस्थापिता-शिक्षामन्त्री



केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः प्रोक्तवान् यत् भारतम् वैश्विकपटले नेतुं नवीन राष्ट्रिय-शिक्षा-नीत्याः परिकल्पना संस्थापिता। नवदिल्ल्यां दिल्ली विश्वविद्यालयस्य एकाधिकैक-शततमं दीशान्तसमारोहं सम्बोधयन् श्रीप्रधानः सबलेन प्रतिपादितवान् यत् समग्रे हि देशे नवीनायाः राष्ट्रिय-शिक्षा-नीत्याः क्रियान्वयनेन सप्तचत्वारिंशदधिक-द्विसहस्र-तमवर्षपर्यन्तं भारतं विकसितराष्ट्र निर्मातुं शक्यते इति । श्रीप्रधानः विंशत्यधिक-द्विसहस्र तमवर्षीयायाः राष्ट्रिय-शिक्षा-नीत्याः साफल्येन अभिग्रहणे दिल्लीविश्वविद्यालयं भूरिशः प्रशंसितवान् । विश्वासंच प्रकटितवान् यत् अयं विश्वविद्यालयः भविष्यकाले दिल्ली नगरं प्रमुखज्ञान-केन्द्रस्य रूपेण विनिर्मातुं महत्वपूर्णं भूमिकां निभालयिष्यति।

## महाशिवरात्र्युत्सवम् उद्दिश्य प्रयागराजस्य स्वरूप-रानी-नेहरू-चिकित्सालये शयनासनानां संख्या वर्धिता



हिमसंस्कृतवार्ताः जतिनशर्मा। फेब्रुवरी मासस्य षड्विंशे दिनाङ्के महाशिवरात्र्युत्सवम् उद्दिश्य प्रयागराजस्य स्वरूप-रानी-नेहरू-चिकित्सालये गहन चिकित्सा-विभागे शयनासनानां संख्या सप्तचत्त्वारिंशदधिक-एकशत परिमितं यावत् समेधिता। महाकुम्भावसरे ससमये चिकित्सा सुविधा-प्रदानार्थं उत्तर-प्रदेश-सर्वकारेण अयं पदक्षेपः सन्धारितः। मोतीलाल नेहरू-चिकित्सकीय-महाविद्यालयस्य संचारमाध्यम प्रभारिणा डॉ. संतोष सिंहेन विज्ञापितं यत् एस-आर-एन. इत्यस्मिन् चिकित्सालये अभिघातोपचारस्य संवातकस्य च सौविध्यं चतुर्विंशति-होरां यावत् समुपलब्धं विद्यते । आपात्कालिक-चिकित्सा-दलानि-समेत्य एते विभागाः अत्याधुनिकोपकरणैः संवलिताः सन्ति। अपरत्र श्रद्धालूनां बृहत्तमां संख्याम् समाश्रित्य उत्तर प्रदेश-माध्यमिक शिक्षा-परिषदा चतुर्विंशति-दिनाङ्के प्रयागराजे दशम-द्वादश-कक्षयोः परीक्षा स्थगिता जाता। अवशिष्टेषु जनपदेषु परीक्षाः पूर्व-निर्धारित कार्यक्रमानुसारि एव प्रचलिष्यन्त।

## सुभाषितम्

**अतिरूपेण वै सीता,
ह्यतिगर्वेण रावणः।
अतिदानाद्बलिर्बद्धो,
अति सर्वत्र वर्जयेत्।।**

हिन्दर्थः- अतिरूपवती होने से सीता का अपहरण किया गया, अतिगर्वी होने से रावण मारा गया। अत्युदारता के कारण राजा बलि का नाश हुआ, अतः अति का सर्वत्र त्याग करना चाहिए।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## धावनक्रीडायाम्, गुलवीरसिंहेन त्रयोदश निमेषानाम् अपि अल्पसमये सम्पूर्य ऐतिह्यं विरचितम्



हिमसंस्कृतवार्ताः। धावनक्रीडायाम्, गुलवीरसिंहेन पुरुषाणां पञ्चसहस्त्रमीटर परिमिताम् आन्तरिक धावनक्रीडां त्रयोदश निमेषानाम् अपि अल्पसमये सम्पूर्य ऐतिह्यं विरचितम् । एतेन साकमेव एषः प्रथमः भारतीयः जातः । बोस्टनइत्यत्र बीयू-टेरियर-डी.एम.आर. चैलेन्ज इत्येतस्यां स्पर्धायां गुलवीरे कीर्तिमानं स्थापितम् । अनेन विजयेन लयन साकमेव सितम्बरमासे भविष्यमाणायै जापानदेशस्य तोक्योनगरे विश्व-चैम्पियनशिपप्रतिस्पर्धायै प्रवेशः अधिगतः ।

# HRTC- एचआरटीसी- संचालकमण्डलस्य अनुमोदनं ६०० कोटिरूप्यकैः ७०० बसयानानि क्रीयन्ते



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- पथपरिवहननिगमेन विविधबसयानानां क्रयणाय अनुमोदनं कृतम्। शनिवासरे आयोजितस्य एचआरटीसी- निदेशकमण्डलस्य सत्रे प्रायः ६०० कोटिरूप्यकाणां व्ययेन प्रायः ७०० बसयानानां क्रयणस्य अनुमोदनं कृतम्। अस्मिन् केचन प्रकरणाः मन्त्रिमण्डलस्य सूचनायै प्रेषिताः भविष्यन्ति। एषा सूचना उपमुख्यमंत्रिणा मुकेश अग्निहोत्रिणा पत्रकारसम्मेलने दत्ता। सः अवदत् यत् शीघ्रमेव कर्मचारिणां अवशिष्टांशस्य निस्तारणं भविष्यति, यत् मुख्यमन्त्रिणा एव सार्वजनिकरूपेण घोषितम् अस्ति। धनस्य प्राप्तौ किञ्चित् विलम्बः अभवत्, यस्मात् कारणात् तस्य भुक्तिः कर्तुं न शक्यते स्म। परन्तु हिमाचलपथपरिवहननिगमस्य उपाध्यक्षः अस्मिन् विषये कर्मचारिभिः सह वार्तालापं करिष्यति। संचालकमण्डलस्य समागमानन्तरं मुकेश अग्रवालः अवदत् यत् २९७ विद्युत्बसयानानां क्रयणार्थं क्रयसमित्याः अनुशंसाः स्वीकृताः, ये अधुना मन्त्रिमण्डलस्य सूचनायां आनीष्यन्ते। तेषां औपचारिकताः सम्पन्नाः, तेषां कृते धनं सर्वकारेण दातव्यम् अस्ति।

## २५० डीजलबसस्य निविदाः अनुमोदिताः

सः पक्षम् अकरोत् यत् ४ मासेभ्यः परं हिमाचलस्य मार्गेषु विद्युत्बसयानानि प्रचलन्तः दृश्यन्ते। एतेन सह २५० डीजलबसयानानां निविदा अनुमोदिता यत् ३७ आसनयुक्तं भविष्यति। २४ सुपर डीलक्स विलासिनी बसयानानां क्रयणमपि अन्तिमरूपेण निर्धारितम् अस्ति, यत् मन्त्रिमण्डलं प्रति प्रेषितं भविष्यति। अग्निहोत्री इत्यनेन उक्तं यत् २३ टाइप-एक विद्युत् बसयानानि अपि क्रेतव्यानि येषां कृते प्रोत्साहनरूपेण धनम् आगतम्। परिवहनविभागः एतत् धनं दास्यति। सः अवदत् यत् १०० मिनी, मिडी- बसयानानां निविदा अद्यापि अन्तिमरूपेण न निर्धारिता, पुनः निविदा याचिता। एतानि अपि पुनः निविदाद्वारा क्रीतानि भविष्यन्ति। सः अवदत् यत् आगामिसमये एच.आर.टी.सी. इत्यस्मिन् बसयानानां अभावः निराकृतः भविष्यति यतः तेन १५ वर्षाणि पुरातनानि बसयानानि त्यक्तव्यानि सन्ति। एतदतिरिक्तं एचआरटीसी द्वे द्रुतप्रतिक्रियावाहने, ४ क्रेनयानानां च क्रयनं भविष्यति।

## एकस्मिन् वर्षे आयः वर्धितः

उपमुख्यमंत्रिणा उक्तं यत् एचआरटीसी निरन्तरं परिष्कारात्मकानि पदानि गृह्णाति यस्य कारणतः एकवर्षे तस्य आयस्य वृद्धिः ७० कोटिरूप्यकाणि अभवत्। महिलासहितं २७ वर्गेषु रियायतयात्रा प्रदत्ता अस्ति। प्रतिदिनं ५ लक्षं जनाः स्वगन्तव्यस्थानेषु परिवहनं क्रियन्ते। नवीननियुक्तीनां विषये सः अवदत् यत् पूर्णपारदर्शितया सह परिचालकानां नियुक्तिः कृता अस्ति यदा तु आवश्यकतानुसारं चालकानां नियुक्तिः भविष्यति। सम्प्रति पर्याप्तसङ्ख्यायां चालकाः उपलभ्यन्ते।

# टीजीटी शास्त्री इत्यस्य स्थाने टीजीटी संस्कृतम् इति संस्कृतमहाविद्यालयान्, शास्त्रपरम्परां च समाप्त्यर्थं प्रथमचरणम्




**हिमसंस्कृतवार्ताः- चैतन्य शर्मा, शिमला**

हिमाचलप्रदेशसर्वकारेण शास्त्री शिक्षकाणां नवीन नियुक्ति एवं पदोन्नति नियमाः कृताः। एतेषां नियमानां विषये संस्कृतछात्रसंघः सर्वकारं प्रति स्वपक्षं स्थापयिष्यति। शास्त्रसंरक्षणछात्रसंघः अन्यसंगठनानि च शिक्षा शास्त्री (बीएड) विरोधी न सन्ति। यदि सर्वकारेण शास्त्रीअध्यापकेभ्यः टीजीटी पदनाम दातव्यं चेत् तस्य नाम टीजीटी शास्त्री इति भवितव्यं न तु टीजीटी संस्कृतमिति। शास्त्रसरंक्षणछात्रसंघेन सह विभिन्नसंस्कृतसंगठनाः च सोमवासरे विषयस्य स्पष्टतायै सर्वकारं प्रति स्वकीयं पक्षं स्थापयिष्यन्ति। सर्वे इच्छन्ति यत् संस्कृतमहाविद्यालयेषु पठन्तः छात्राः पंचवर्षेषु पंच शास्त्राणाम् अध्ययनं कृत्वा शास्त्रीउपाधिं प्राप्नोति। एकः सामान्यस्नातकः तत्तुल्यः कथं भवितुम् अर्हति यतोहि सः स्नातकस्तरे एकं विषयं संस्कृतस्य पठति। अनेन न केवलं संस्कृतमहाविद्यालयानां छात्राणां भविष्यं क्षीणं भविष्यति अपि तु देवभूमिहिमाचले शास्त्रस्य ह्रासो अपि भविष्यति। यदि अनेन सारल्येन शास्त्रीपदेषु स्नातकसंस्कृतं योग्यः भविष्यति तर्हि कश्चन् क्लिष्टशास्त्रीयग्रंथान् किमर्थं पठिष्यति? संस्कृतमहाविद्यालयेषु छात्राणां प्रवेशः न्यूनः भविष्यति। यदि सर्वकारः स्नातकसंस्कृतम् इत्येनं शास्त्रीसमकक्षम् आनेतुम् इच्छति तर्हि तेषां पाठ्यक्रमेऽपि तानेव शास्त्रीयग्रन्थान् योजयेत् ये संस्कृतमहाविद्यालयेषु सन्ति। सर्वेषु महाविद्यालयेषु च संस्कृत- आचार्याणां पदानि भवेयुः। राष्ट्रीयशिक्षानीतिः अपि भारतीयज्ञानपरम्पराया: मूलं संस्कृतशास्त्रेषु निहितम् इति कथयति। अतः सर्वे संस्कृत महाविद्यालयानां छात्राः आशान्विता सन्ति यत् अधिकारिणः सर्वकारश्च विषयस्य गंभीरतां अवगत्य उचितनिर्णयं करिष्यन्ति।

# अधुना कारागारेषु बन्दीनां विरुद्धं जाति- आधारितः भेदभावः न भविष्यति, सर्वकारेण कारागार-पुस्तिकायां संशोधनं कृतम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य कारागारेषु बन्दीनां विरुद्धं जाति-आधारितः भेदभावः न भविष्यति। राज्यसर्वकारस्य प्रवक्ता शनिवासरे अवदत् यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः मार्गदर्शनानुसारं बन्दीनां मध्ये समानतां सुनिश्चित्य जाति- आधारित- कार्य- आबंटनं समाप्तं कर्तुं राज्यसर्वकारेण हिमाचलप्रदेश- कारागार- पुस्तिका- २०२१ इत्यस्मिन् सर्वेषु जाति-आधारित-प्रावधानेषु संशोधनं कृतम् अस्ति। प्रवक्ता अवदत् यत् राज्यसर्वकारेण कारागारेषु परिष्कारसंस्थासु च जाति-आधारित-भेदभावस्य निषेधार्थं पुस्तिकायां एकः अनुच्छेदः प्रविष्टः अस्ति। नववियोजितप्रावधानस्य अन्तर्गतं अनुच्छेदः ५.६६ इत्यनेन सुनिश्चितं भवति यत् जाति-आधारेण बन्दीनां भेदभावः, वर्गीकरणं, पृथक्करणं वा न भविष्यति। ५.६७ अनुच्छेदस्य अनुसारं बन्दीगृहेषु कर्तव्यानि कार्याणि च जाति-आधारेण न आबंटितानि भविष्यन्ति।

सः अवदत् यत् अनुच्छेदः ५.६८ मध्ये बन्दीनां हस्ताभ्यां मलिनावशेषवहनं, सीवर-व्यवस्थायाः परिपालने, सेप्टिक-भण्डारस्य स्वच्छतायां च न संलग्नाः इति व्यवस्था अस्ति। पूर्वं कारागृहस्य पुस्तिकायां महिलाकारागृहस्यस्य अभावे स्वच्छताकार्यं कर्तुं वेतनप्राप्ताः कर्मचारिणः नियोजिताः इति प्रावधानम् आसीत्। अधुना अनुच्छेदः २१४ अन्तर्गतः अयं खण्डः पूर्णतया निष्कासितः अस्ति। प्रवक्ता अवदत् यत् इदानीं कारागृहे स्थितानां बन्दीनां जाति- समुदाय- धर्म- सम्बद्धतायाः उल्लेखः कारागृह-अभिलेखेषु न भविष्यति। जातिः, सम्प्रदायः, अदोषी बन्दीनां पञ्जिका-प्रवेशसम्बद्धः प्रथम-क्रमांक-पञ्जिकायाः खण्डः पञ्चमः तथा च पैरा-सङ्ख्या ३३/०६ मध्ये उल्लिखितानां दोषीणां रजिस्टर-क्रमांक- द्वितीयस्य बिन्दु-क्रमांक-द्वितीयस्य खण्डः विलोपितः अस्ति। पूर्वं जेलपुस्तिकासु एतादृशवर्गीकरणस्य प्रावधानानि समाविष्टाणि आसन्। राज्यसर्वकारेण हिमाचलप्रदेश-कारागृहपुस्तिका द्वितीयसंशोधनं २०२५ इत्यस्य माध्यमेन एतानि परिष्काराणि प्रवर्तितानि सन्ति।

# वाथूटिप्परी विद्यालयस्य ११ कक्षायाः छात्रा रितिका सिङ्गापुर-एक्सपोजर-भ्रमणात् प्रत्यागतवती



हिमसंस्कृतवार्ताः दिनेशकुमारः। जसवां विधानसभाक्षेत्रस्य वरिष्ठमाध्यमिकविद्यालयस्य बाथुटिप्परी इत्यस्य छात्रा रितिका शनिवासरे कम्बोडिया-सिङ्गापुरयोः एक्सपोजर-भ्रमणानन्तरं विद्यालयं प्राप्तवती। विद्यालयं प्राप्ते प्रधानाचार्यराजेशकुमारस्य अध्यक्षतायां विद्यालयस्य शिक्षकैः विद्यालयप्रबन्धनसम्मित्याः सदस्यैः तस्याभिवादनं कृतम्। प्रधानाचार्येणोक्तं यत् अन्ये छात्राः अपि रितिकया प्रेरणां प्राप्स्यन्ति।

# शिक्षायाः परमं लक्ष्यं उत्तमं मानव-निर्माणं वर्तते- "डॉ. चांदकिरणसलूजा"

## संस्कृत-शिक्षक-कौशलविकासप्रशिक्षणकार्यशालायाः भव्यशुभारम्भः




**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला।**
हरिद्वारे उत्तराखण्ड- संस्कृत- अकादम्या संस्कृतविद्यालय- महाविद्यालयेषु कार्यरतानां शिक्षकेभ्यः शिक्षणकौशलविकासार्थं त्रिदिवसीया प्रशिक्षणकार्यशाला भव्यतया आरब्धा। अकादम्याः सभागारे दीपप्रज्वलनं कृत्वा कार्यशालायाः विधिवत् शुभारम्भः अभवत्। अस्मिन् प्रसङ्गे अकादम्याः सचिवः डॉ. वाजश्रवा आर्यः स्वगर्जनया अवदत् यत् उत्तराखण्डराज्यस्य द्वितीया राजभाषा संस्कृतम् अस्ति। अतः अस्या संरक्षणं संवर्धनं च आवश्यकम्। एषा अकादमी निरन्तरं संस्कृतस्य प्रचार-प्रसारं प्रति समर्पिता वर्तते। शिक्षकेभ्यः नवीनतमशिक्षण-प्रणालीनां ज्ञानं दातुं प्रतिष्ठित-प्रशिक्षकानां मार्गदर्शनं संजायते। कार्यशाला-संयोजकः किशोरीलाल रतूड़ी अवदत् यत् अस्याः कार्यशालायाः व्यवस्थापनं संस्कृतसंवर्धनप्रतिष्ठानस्य दिल्लीप्रशिक्षकमण्डलेन कृतम्। अत्र षट् प्रशिक्षकानां मार्गदर्शनस्य साहाय्येन त्रिदिवसेषु पञ्चदशसत्राणि आयोज्यन्ते। अस्मिन् प्रशिक्षणकार्यक्रमे उत्तराखण्डराज्यस्य पञ्चाशत् शिक्षकाः भागं गृह्णन्ति।

मुख्यप्रशिक्षकः डॉ. चांदकिरणसलूजामहोदयः प्रशिक्षणस्य आरम्भे शिक्षकेभ्यः सम्बोधनं कृत्वा अवदत् यत्- संस्कृतं केवलं भाषा न अस्ति अपि तु जीवनशैली अपि अस्ति। शिक्षायाः मूलोद्देश्यं छात्राणां सर्वांगीण-विकासः एव। अस्मिन् शिक्षकेषु महत्त्वपूर्णं दायित्वं विद्यते। शिक्षणं केवलं वृत्तिः न, अपितु उत्तमं सेवाकार्यं च। शिक्षायाः परमं लक्ष्यं उत्तमं मानव-निर्माणं वर्तते। शिक्षकाः शिक्षणे सरलतां योजयन्तु, परीक्षा छात्राणां 'प्राणप्रदानस्य' कारणं भवतु, न तु 'प्राणहरणस्य'।

तस्मिन्नेव अवसरे संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. दिनेशचन्द्र शास्त्री अपि स्वगर्जनया उक्तवान् यत्- संस्कृतं राज्यस्य द्वितीया राजभाषा अस्ति, अतः सर्वे संस्कृतविद्यालय- महाविद्यालय- शिक्षकाः एषु प्रशिक्षणसत्रेषु भागं ग्रहीतुम् अर्हन्ति। अस्मिन् कार्यक्रमे संस्कृत- संवर्धन-प्रतिष्ठानस्य पालकः लक्ष्मीनरसिंहन्, विष्णु उपाध्यायः, पारूलसिंहः, सुनीलशर्मा, मनमोहनशर्मा च विशेषरूपेण उपस्थिताः तथा सहैव उत्तराखण्ड- संस्कृत-अकादम्याः शोधाधिकारी हरीशगुरुरानी, प्रशासनिक-अधिकारी लीला रावतः, रमा कठैतः चापि कार्यक्रमे सक्रियतया भागं गृहीतवन्तः। अत्रैव विवेकः, मोहितरावत, प्रीतमः, पंकजनेगी, सुशीलः, आकांक्षा त्रिपाठी, अवधेशः, ओमप्रकाशभट्टः, अश्विनी, लक्ष्मीचन्दः इत्यादयः अपि सम्मानिताः संस्कृतसेवकाः उपस्थिताः आसन्।

# भारतीय-ज्ञान-परम्परायां वैश्विक-चेतनासन्दर्भे

## द्विदिवसीय-राष्ट्रिय-संगोष्ठ्याः समापनम्




**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, चमोली।**
उत्तराखण्डस्य चमोलीजनपदस्थे संस्कृतविभागेन डॉ. शिवानन्दनौटियाल-राजकीय- स्नातकोत्तर- महाविद्यालयेन कर्णप्रयागे "भारतीय- ज्ञान- परम्परायां वैश्विकचेतना" इत्यस्मिन् विषये द्विदिवसीय- राष्ट्रीयसंगोष्ठी सफलतया आयोजिता। संगोष्ठ्यां विविधराज्येभ्यः प्रतिभागिनः स्वस्वशोधपत्राणि वाचयितुं भागं गृहीतवन्तः। समापनसत्रसहितम् अष्टसत्राणि आयोजितानि। झारखण्डं, पंजाबः, दिल्ली-विश्वविद्यालयः, उत्तराखण्डः, उत्तरप्रदेशः, उड़ीसा, छत्तीसगढः इत्यादिभ्यः राज्येभ्यः विविधशोधार्थिनः सहायक- प्राध्यापकाः च स्वशोधपत्राणि प्रकटितवन्तः। समापनसत्रे मुख्यातिथिः प्रो. राणामहोदयः अवदत् यत् एतेषु कार्यक्रमेषु सहभागिता छात्रान् शोधं प्रति प्रेरयिष्यति। समापन-सत्रस्य अध्यक्षः प्राचार्यः प्रो. वी. एन. खालीमहोदयः "इलियट" इत्यादीनां पाश्चात्यविदुषां भारतीय-ज्ञान-परम्परायाः ग्रहणं कृत्वा स्वग्रन्थेषु तस्य उपयोगः इत्यस्मिन् विषये प्रकाशं चकार। डॉ. पंकजकुमारः सत्रस्य अध्यक्षत्वं कृत्वा अवदत् यत्- भारतीय- ज्ञान- परम्परा शीघ्रमेव प्रतिष्ठापनीया, यतो मानवजातेः वाञ्छितं कल्याणं सम्पद्येत्। कार्यक्रमसंयोजकः डॉ. मृगांक मलासी द्विदिवसीयसंगोष्ठ्याः सर्वेषां सत्राणां सारं प्रस्तुतवान्। मुख्यवक्ता डॉ. अण्थवालमहोदयेन ऐतिहासिकपरम्परायाः परिदृश्यम् अधिष्ठाय स्वविचाराः प्रस्तुताः।

सारस्वतातिथिः डॉ. वी. पी. भट्टमहोदयेन वनस्पतीनां परिप्रेक्ष्ये वैदिक-वाङ्मयान्तर्गतं तथ्यं व्याख्यातम्। विशिष्टातिथिः डॉ. एम. एस. कण्डारी अवदत् यत् भारतीय- ज्ञान- परम्परायाः मूलानि अतिमात्रं गूढानि सन्ति, यतः नोबेल-पदक- लाभार्थिनः अपि गीतायाः प्रेरणां गृह्णन्ति।

समापनसत्रस्य मुख्यातिथिः डॉ. अखिलेश-कुकरेती अवदत् यत् भारतस्य प्रतिष्ठा संस्कृतिः संस्कृतं च वर्तते। कार्यक्रमस्य संचालनं डॉ. मदनलालशर्मणा कृतम्। अस्मिन् सन्दर्भे महाविद्यालयस्य समस्तप्राध्यापकाः डॉ. रमेशचन्द्रभट्टः, डॉ. भालचन्द्रनेगी, डॉ. चन्दावती, डॉ. कवितापाठकः, डॉ. हरीश बहुगुणा, डॉ. हरीशरतूड़ी, डॉ. पूनमः, डॉ. दीपसिंहः, डॉ. चन्द्रमोहनः, डॉ. स्वातिः, डॉ. हिना, रवीन्द्रनेगी, डॉ. शालिनी सैनी, डॉ. नरेन्द्र पंघालः, डॉ. कमलकिशोरद्विवेदी, एस. एल. मुनियालः, जे. एस. रावतः इत्यादयः समस्तप्राध्यापकाः, विद्यार्थीगणः, शोधार्थिनः च उपस्थिताः आसन्।

# संस्कृतमहाविद्यालये चम्बायां मार्गसुरक्षा विषये प्रतियोगितानामायोजनम्

**हिमसंस्कृतवार्ताः चम्बा 23 फरवरी।** गतशनिवासरे राजकीयसंस्कृत महाविद्यालय चम्बायाम् प्राचार्यानुमत्यानुसारं ROAD SAFETY CLUB इत्यस्याधिष्ठातृणा आचार्यगेवरामेन महाविद्यालीयछात्राणां कृते विभिन्नप्रतियोगितानामयोजनं कृतम् । एतासु प्रतियोगितासु भाषाणप्रतियोगितायां ,निबन्धलेखनप्रतियोगितायां चित्रकलाप्रतियोगितासु छात्राः सहर्षेण भागं गृहीतवन्तः । अस्य कार्यक्रमस्य मुख्यातिथिः महाविद्यलयस्यैव प्राचार्यः सञ्जीव कुमारः आसीत्। भाषाणनिबन्धप्रतियोगितयोः निर्णायकौ डा .जयकृष्णशर्मा ,श्री कपिलमोहन च आस्ताम्।





# मध्यप्रदेश-बिहार असमप्रदेशानां त्रिदिवसीययात्रायां भविष्यति प्रधानमन्त्री



हिमसंस्कृतवार्ताः। प्रधानमन्त्री श्री नरेन्द्र मोदी अद्यारभ्य मध्यप्रदेश-बिहार असमप्रदेशानां त्रिदिवसीययात्रायां भविष्यति । श्रीमोदी अद्य मध्यप्रदेशस्य छतरपुरजनपदे बागेश्वर-धाम-चिकित्सा एवं विज्ञान -अनुसन्धान-संस्थानस्य आधारशिलां स्थापयिष्यति । सोमवासरे प्रधानमन्त्री बिहारस्य भागलपुरक्षेत्रे गमिष्यति । अत्रावसरे सः प्रधानमन्त्री-किसान-योजनायाः एकोनविंशतितमं देयराशिं प्रकाशयिष्यति। अतः परं प्रधानमन्त्री श्रीमोदी झुगोर-बिनन्दिनी-कार्यक्रमे भागग्रहणार्थं गुवाहाटीं प्रति गमिष्यति । अयं कार्यक्रमः चायोद्योगस्य द्विशतवर्षाणां पूर्तेः प्रतीको वर्तते ।

# हिमाचलप्रदेशे त्रीणिदिनानि यावत् प्रचण्डवृष्टेः हिमपातस्य च सचेतना, लाहौल-स्पीतौ कठिनताः निरन्तरं वर्धन्ते



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**
हिमाचलप्रदेशस्य आदिवासीक्षेत्रे लाहौल-स्पीतौ अद्यतनकाले हिमपातस्य कारणेन जनानां कष्टानि न्यूनानि न अभवन्। शनिवासरे प्रातःकाले अपि रोहताङ्ग-दर्रा इत्यनेन सह उच्चशिखरेषु अश्मपातः अभवत्। २ तः ३ पादपर्यन्तं हिमपातेन आच्छादितेषु लाहौलस्य उपत्यकासु अपि हिमस्खलनस्य संकटः वर्धितः अस्ति। अस्य विषये मण्डलप्रशासनेन पर्यटकानां सामान्यजनानाञ्च हिमयुक्तेषु क्षेत्रेषु यात्रां न कर्तुं निर्देशः दत्तः। लाहौल-कुल्लू-जनपदयोः अद्यापि १८० मार्गाः यातायातस्य कृते अवरुद्धाः सन्ति। अपरपक्षे ऋतुविज्ञानविभागेन पुनः राज्ये प्रचण्डवृष्टिः, हिमपातः च इति सचेतना प्रसारिता अस्ति। राजधान्यां शिमलायां शनिवासरे दिवा लघुसूर्यप्रकाशेन सह मेघयुक्ता एव अभवत्।

## एतेभ्यः दिनेभ्यः प्रचण्डवृष्टेः, हिमपातस्य च सम्भावना

ऋतुविज्ञानकेन्द्रशिमलायाः अनुसारं २४ फरवरीमासस्य रात्रौ उत्तर-पश्चिमी-भारतदेशं नूतनं पाश्चात्य-उपद्रवं प्रभावितं करिष्यति। तस्य प्रभावात् राज्ये २५ फरवरीतः २८ पर्यन्तं वर्षा- हिमपातस्य पूर्वानुमानं वर्तते। फरवरी-मासस्य २२ दिनाङ्के लाहौलस्पीतेः, किन्नौरस्य च एकान्तस्थानेषु अपि च चम्बा- काङ्गड़ा- कुल्लु- उच्चक्षेत्रेषु लघुवृष्टिः, हिमपातस्य च सम्भावना वर्तते। २५ फरवरी दिनाङ्के राज्यस्य अनेकस्थानेषु लघुतः मध्यमपर्यन्तं वर्षा, हिमपातस्य च सम्भावना वर्तते। २६ फरवरीतः २८ दिनाङ्कपर्यन्तं राज्यस्य अधिकांशस्थानेषु लघुतः मध्यमपर्यन्तं वर्षा, हिमपातः च भविष्यति। अस्मिन् काले बहुषु स्थानेषु प्रचण्डवृष्टेः, हिमपातस्य च पीतसचेतना कृता। २३, २४ फरवरी दिनाङ्कयोः शुष्कवायुः अपेक्षितः अस्ति।

# पातञ्जलयोगसूत्रम्

## योगशास्त्रस्य प्रणेता पतञ्जलिः

पातञ्जलयोगसूत्रस्य रचयिता महर्षिः पतञ्जलिः । अयं पतञ्जलिः जीवः ईश्वरश्चेति तत्वद्वयं स्वीकरोति । अतः एव अस्य दर्शनस्य "सेश्वरसांख्यदर्शनम्" इति नामान्तरम् । अस्यैव शास्त्रस्यापरं नाम "सांख्यप्रवचनम्" इति । एतद्दर्शनं पतञ्जलिना प्रणीतत्वात् "पातञ्जलदर्शनम्" इत्यपि व्यवहारयोग्यं भवति । यद्यपि पतञ्जलेः पूर्वाचार्याः हिरण्यगर्भयाज्ञवल्क्यादयः अनेके आचार्याः योगशास्त्रस्य प्रवक्तारः आसन्, अथापि जनसाधारणानां कृते पतञ्जलिरेव तं योगशास्त्रं सूत्ररूपेण ग्रन्थीकृत्य सम्यक् सरलरीत्या व्याजहार इति हेतोः अस्य योगदर्शनस्य "पातञ्जलदर्शनम्" इति नाम सयुक्तिकं तिष्ठति ।

### योगशास्त्रपरिचयः

अस्मिन् योगशास्त्रे चत्वारः पादाः सन्ति । तेषां नामानि क्रमाद् भविष्यन्ति -समाधिपादः, साधनपादः विभूतिपादः, कैवल्यपादश्चेति । प्रथमे पादे भगवान् पतञ्जलिः -'अथ योगानुशासनम्',[३] इति शास्त्रारम्भस्य प्रतिज्ञां करोति । अनन्तरं योगस्य परिभाषा अस्ति -"योगश्चित्तवृत्तिनिरोधः" [४] इति । चित्तवृत्तयः-प्रमाणविपर्ययविकल्पादयः । एतेषां निर्वर्तनं योगशब्दार्थः । समाधिशब्दस्यार्थः -सम्यक् आधानम् इति, अर्थात् चित्तस्य स्वात्मस्वरूपे अवस्थापनमिति । योगवासिष्ठे समाधिलक्षणमेवमभिहितम्-
**'इमं गुणसमाहारमनात्मत्वेन पश्यतः ।**
**'अन्तः शितलता यस्य समाधिरिति कथ्यते ॥ इति ।**
द्वितीये साधनपादे -" तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (यो० सू०-१) इत्यादि सूत्रद्वारा चञ्चलचित्तपुरुषाणां तपः स्वाध्यायादि क्रियायोगः एवं यमनियमादिबहिरङ्गसाधनभूतानां तत्त्वानामुल्लेखः वर्णितः । अत्र तपः इति शब्देन चान्द्रायणादिक्लेशकारकस्य तपसः अर्थावबोधो न भवति, यतः चान्द्रयणादयः शरीरे क्लेशजनकत्वात् तेन चित्तस्य ऐकाग्र्यं न तिष्ठति । अत्र तपः शब्दार्थः इत्थंभूतः भवति-हितकारकं स्वल्पं सात्विकभोजनं तथा शीतोष्णसुखदुःखादीनां सहनं एवमिन्द्रियाणां निरोधात्मकं यद्भवति तत्तपः इत्युच्यते । योगशास्त्रे तपः प्रसन्नकरणात्मकं वर्तते न तु पीडात्मकम् । स्वाध्यायस्यार्थः-मोक्षशास्त्राध्ययनं या नियमपूर्वकं प्रणवादिजपानुष्ठानमिति । ईश्वर-प्रणिधानं नाम परमात्मनः अनुचिन्तनम् अथवा परमात्मनि सर्वकर्मणां समर्पणम् इति भवति । सर्वेषु क्रियायोगेषु ईश्वरप्रणिधानं नाम क्रियायोगः उत्तमः इति स्वीक्रियते । "यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्" इति ईश्वरप्रणिधानयुक्तः पुरुषः सर्वकर्माणि ईश्वरार्पितसेवाबुध्या करोति इत्यादयः विषयाः प्रतिपादिताः । तृतीये विभूतिपादे -जन्मान्तरज्ञानं, भूतभविष्यदर्थकं ज्ञानं, अन्तर्हितम् इत्यादि अनेकप्रकाराः सिद्धयः उपन्यस्ताः । चतुर्थे कैवल्यपादे - "जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः" [५] इति सूत्रेण पञ्चानां सिद्धीनां वर्णनं करोति । देवतानां सिद्धिः जन्मना एव जायते । एवं पक्षिणामाकाशे उड्डयनं पशूनां जलतरणमित्यादि जन्मतः एव प्रसिद्धः । ओषधेभ्यः सिद्धिः प्राप्यते । आयुर्वेद, रसेश्वरदर्शनादिषु सिद्धिरियं वर्णिता । मन्त्रेण एवं तपोबलेन सिद्धीनां प्राप्तिवर्णनं तन्त्रादिशास्त्रेषु मिलिष्यति । समाधेः सिद्धिः शास्त्रस्यास्य गौणविषयभूता भविष्यति । यमनियमादि अष्टाङ्गोपासनेन यदा योगवृक्षः फलति तदा पूर्णभावनया समाधिरुपफलपरिपकानन्तरं प्रकृति-पुरुषयोः भेदात्मकः साक्षात्कारः सिध्यति । तदानीं असंगः पुरुषः स्वस्वरूपावस्थानेन तिष्ठतीति कृत्वा आत्यन्तिकदुःखविनाशरूपः मोक्षः सिध्यति । अस्मिन् योगशास्त्रे षड्विंशतितत्त्वानि भवन्ति । यथा सांख्याभ्युपगतानि पञ्चविंशतितत्त्वानि, एतेषामतिरिक्तत्वेन एकः ईश्वरः अस्तीति ईश्वरतत्त्वमपि पतञ्जलिरयं स्वीकरोति इत्यतः अस्य नाम सेश्वरवादी सांख्यः इति । ईश्वरस्य लक्षणमेव प्रतिपादयति पतञ्जलिः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः (यो० सू० १-२४) इति । वैदिकी जीवनपद्धतिः धर्मार्थकाममोक्षरूपिणि पुरुषार्थचतुष्टये आश्रिता वर्तते । अन्तिमः पुरुषार्थः एव जीवनस्य अन्तिमम् उद्देश्यम् अस्ति । तदर्थमेव दर्शनशास्त्राणां प्रवृत्तिर्जायते यद्यपि सर्वाणि दर्शनानि स्व-स्वसिद्धान्तानुसारं मोक्षस्य निरूपणमकुर्वन् तथापि योगदर्शनं मोक्षस्य कृते साक्षात्कृतयत्नो विधीयते । मोक्षस्य कृते एव योगस्य उदयः सञ्जातः । इदं तात्पर्यं 'योग' पदस्य व्युत्पत्त्याऽपि स्पष्टमस्ति । "युज् समाधौ" धातोः योगशब्दस्य निष्पत्तिः संजाता । आत्मनः परमात्मनि विलय एव योग उच्यते । यदा त्रिविधदुःखानाम् एकान्तिकी आत्यन्तिकी च निवृत्तिर्भवति, तदा आत्मा स्वरूपे विलीनो भवति । तत्पश्चात् जननमरणादयः पुनर्न जायन्ते । अस्य आत्मसाक्षात्कारस्य शास्त्रीयं मार्गदर्शकं योगशास्त्रमस्ति । समाधेरवस्थायाः अपरः पर्यायो योगः एवास्ति । चित्तवृत्तिः बाह्यजगतः अपवार्य आन्तरतत्त्वे स्थिरयेत् इत्याकारकोऽयं योगमार्गोऽत्र प्रतिपादितः ।

# हास्यकणिका



## पुरुषाणां कृते श्रीमान्, महिलानां कृते श्रीमती शब्दः किमर्थम्?

कारणम्- सर्वस्मै/ सर्वस्यै भ्रमाय 🫣 😵
भ्रमाय- किमर्थम्?
पुरुषाणां मानः नास्ति एवं महिलासु मतिः नास्ति, अतः 😅 🤣 😂 😁 😋

**डॉ.विदुषी अग्रवालः, हिमसंस्कृतवार्ताः**

# विचार्यताम्

आकाशात् पतितायाः वर्षायाः जलं करतले अञ्जल्यां गृहीतुं शक्यम्, तेन पादप्रक्षालनमपि शक्यं भवेत्। परं यदि तज्जलं प्रणाले पतितं चेत् तस्य प्रतिष्ठा नष्टा एव। तेन पादप्रक्षालनमपि शक्यं न भवति। सः वर्षाजलबिन्दुः तप्ते पृष्ठभागे यदा पतति तदा सः बाष्पीभूत्वा अदृश्यः एव भवति, तस्य बिन्दुत्वं नश्यति। यदा सः जलबिन्दुः पद्मपत्रोपरि पतति तदा मौक्तिकमिव तेजः प्राप्नोति। परं स्वातिनक्षत्रे वर्तमाने स एव जलबिन्दुः शुक्तिकायां पतित्वा साक्षात् मौक्तिकः एव भवति। इदमेव सारम् एकः एव जलबिन्दुः साहचर्यभिन्नत्वेन संगगुणदोषतः उपयुक्ततां, प्रतिष्ठां, गौरवं, मृत्तिकासायुज्यं मूल्यहीनत्वं प्राप्नोति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्।**

# यूरोपीयायोगस्य अध्यक्षः सप्तविंशति-दिनाङ्कात् द्विदिवसीययात्रार्थं भारतं प्रत्यागमिष्यति

यूरोपीयायोगस्य अध्यक्षः उर्सुला-वॉन-डेर-लेयेन-इत्यसौ अस्य मासस्य सप्तविंशति-दिनाङ्कात् द्विदिवसीययात्रार्थं भारतं प्रत्यागमिष्यति। इयं हि लेयेनइत्येतस्याः भारतं प्रति तृतीया यात्रा स्यादिति। विदेशमन्त्रालयः सूचितवान् यत् यात्राप्रवासे प्रधानमन्त्री नरेन्द्रमोदी उर्सुला-वॉन-डेर-लेयेन-इत्यनेन साकं प्रतिनिधिमण्डलस्तरीयां वार्तां विधास्यति